IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# शाब्दवोधे आलंकारिकदृष्ट्या अलंकारशास्त्रस्य महत्त्वम् मनस्तात्त्विकविश्लेषणमेकम्

निबन्धकः प्रभाकर साहा
संस्कृतविभाग
अध्यापक-गौडमहाविद्यालयः

संसारेऽस्मिन् सृष्टिकालादारभ्य शब्दाह्वयं वागाख्यं ज्योतिः प्रकाशकत्वात्तेजः वितनोति। वाचोऽभावे जगदिदम् अन्धकारमयं सम्पद्यते । तदा जगतीतले सर्वं ज्ञानशून्यमिव प्रतिभाति[1] । तस्माद्वेदे वाचो माहात्म्यं समाम्नातम्–

"उत त्वः पश्यन्न ददर्श वाचम्
उत त्वः श्रृण्वन्न श्रृणोत्येनाम् ।
उतो त्वस्मै त्वन्वं विसस्रे
जायेव पत्य उशती सुवासाः" ।।[2]

पुनश्च ऋक्संहितायाः वाक्सूक्ते आम्नातम् -

[1] "इदमन्धं तमः कृत्स्नं जायते भूवनत्रयम् ।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते" ।। (काव्यादर्शः, (सम्पा.) चिन्मयीचट्टोपाध्यायः,पृ. १४)

[2] महाभाष्यम् (पस्पशाह्निकम्), (सम्पा.) सङ्घमित्रासेनगुप्तः, पृ-५१

"अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।
अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा" ।।[3]

अतो वैदिकसाहित्ये वाग्देवी ब्रह्मरूपेण प्रपूजिता । भगवान् वेदपुरुष आह - अस्य सूक्तस्य द्रष्ट्री वाग्म्भृणी परमात्मना सह तादात्म्यमनुभवन्ती जगद्रुपेण सर्वाधिष्ठातृत्वेन च राजते । वैयाकरणाचार्येण भर्त्तृहरिणा प्रणीते वाक्यपदीये शब्दतत्त्वं सच्चिदानन्दस्वरूपं ब्रह्मैवेति आभाणि। अतः शब्दस्य अद्वैतरूपतत्त्वं मुख्यतया तेन स्वीकृतम् । तथाहि वैयाकरणाचार्यस्य भर्त्तृहरिमते शब्दतत्त्वं परब्रह्मणः अर्थभावरूपेण विवर्त्तते –

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः" ।।[4]

वाङ्मयजगत्यस्मिन् शब्दतत्त्वमतिरिक्तं किमपि नास्ति। सर्वेषां विषयानां प्रधानकारणं तावत् शब्दतत्त्वम्। शब्दस्य शक्तिपरिस्पन्दनमूलकत्वाद् अर्थरूपं जगदिदं वैचित्र्यात्मककर्मणा उपस्थापितम्।

**<u>शब्दस्वरूपम् -</u>**

शब्दस्वरूपविषये महाभाष्यकारेण पतञ्जलिना उक्तम् – 'केषां शब्दानाम् ? लौकिकानां वैदिकानां च । लौकिकाः तावद् गौरश्वः पुरुषो हस्ती'[5] इति । वैदिकाः खलु 'शं नो देवीरभीष्टये' इत्यादयः । ननु शब्दस्य का संज्ञेति चेदुच्यते – "प्रतीतपदार्थको लोके ध्वनिः शब्द इत्युच्यते" ।[6] तद्यथा 'शब्दं कुरु, मा शब्दं कार्षीः, शब्दकार्यमयं माणवकः इति ध्वनिं कुर्वन्नेवमुच्यते । तस्माद् ध्वनिः शब्दः'[7] इति। पुनश्च महाभाष्यकृतागादि– "येनोच्चारितेन सास्नालाङ्गुलककुदखुरविषाणिनां सम्प्रत्ययो

[3] ऋग्वेद (१।७१।४)
[4] वाक्यपदीयम् (सम्पा.) श्रीविष्णुपदभट्टाचार्य्यः, पृ-१
[5] महाभाष्यम् (पस्पशाह्निकम्) (सम्पा.) सङ्घमित्रासेनगुप्तः, पृ-१
[6] तत्रैव
[7] महाभाष्यम् (पस्पशाह्निकम्) (सम्पा.) सङ्घमित्रासेनगुप्तः, पृ-१

जायते स शब्दः[8] इति। शब्दस्यास्य श्रवणेनार्थबोधो जायते इति सर्वजनवादिसम्मतो राद्धान्तः।

न्यायवैशेषिकदार्शनिकोऽन्नंभट्टः चतुर्विंशतिसंख्यकेषु गुणेषु अन्यतमस्य शब्दस्य लक्षणं लक्षितवान् – 'शोत्रग्राह्य गुण शब्दः । स तु आकाशमात्रवृत्ति' । शब्दो द्विविधः – ध्वन्यात्मको वर्णात्मकश्चेति । तत्र ध्वन्यात्मको भेरीदण्डसंयोगजन्यः । वर्णात्मकस्तु संस्कृतभाषादिरूपः।[9] नैयायिकाः वैशेषिकाश्च शब्दार्थयोः स्वाभाविकं सम्बन्धं न स्वीकुर्वन्ति । परन्तु तैरपि तयोः सामयिकसम्बन्धः स्वीक्रियते। शास्त्रादौ उच्यते यत् 'प्रथमे हि विद्वांसः वैयाकरणाः। व्याकरणमूलत्वात् सर्वविद्यानाम्'। पतञ्जलिशब्दार्थयोस्तादात्म्यसम्बन्धमङ्गीचक्रुः। भर्तृहर्य्यादिवैयाकरणाः नागेशः महाभाष्यमतमादाय लघुमञ्जूषायां समर्थितम् – 'तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वम् [तादात्म्यम्]' ।[10] तादात्म्यशब्दस्यार्थः तस्य आत्मा तदात्मा, तदात्मनो भावः तादात्म्यम् । अर्थात् शब्दार्थयोर्मध्ये तादात्म्यसम्बन्धस्तेनैव अङ्गीकृतः। महाभाष्यकारेणापि सम्बन्धव्याख्यानप्रसङ्गे विवृतम् – 'संकेतस्तु पद-पदार्थयोरितरेतराध्यासरुपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थः, योऽर्थः स शब्द इति' ।[11]

काव्यशास्त्रीयदृष्ट्या शब्दानां भेदविषये मतवैलक्षण्यं वर्तते । आचार्यमम्मटः शब्दस्य प्रकारान् प्रकथयन्नाह – "स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा" ।[12] अर्थात् शब्दः वाचकभेदेन लाक्षणिकभेदेन व्यञ्जकभेदेन च त्रिविधः । अत्र इति पदेन काव्यमिति परिग्रहः। वैशेषिकशास्त्रे व्यञ्जकशब्दस्य नामोल्लेखो न श्रूयते । परं साहित्ये व्यञ्जकशब्देन सहृदयानां हृदयाह्लादकारित्वमिति अवगम्यते ।

---

8 तत्रैव

9 तर्कसंग्रहः (सम्पा.) अनामिकारायचौधुरी, पृ- ५२

10 लघुमञ्जूषा (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-५)

11 महाभाष्यम् (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-३)

12 काव्यप्रकाशः(सम्पा.) रामानन्द आचार्यः, द्वितीय उल्लासः, पृ-३

## शब्दार्थयोः सम्बन्धः –

व्याकरणविषये भगवान् पाणिनिः शब्दार्थयोः सम्बन्धमवलम्ब्य सूत्रं प्रणयति स्म। येन निश्चीयते यद्व्याकरणशास्त्रं शब्दान् न विनिर्माति, अपि तु लोकविश्रुतं शब्दमन्वख्याति । खीष्टपूर्वे षष्ठशतके नाट्यशास्त्रे भरतमुनिना प्रोक्तं -

"वाङ्मयानीह शास्त्राणि वाङ्निष्ठानि तथैव च ।
तस्माद्वाचः परं नास्ति वाग् हि सर्वस्य कारणम्" ।।[13]

कालिदासेन शब्दार्थयोः सम्बन्धसिद्धये श्लोकः कश्चनोदाहृतः -

"वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वती परमेश्वरौ" ।।[14]

वागर्थाविव शब्दार्थाविव सम्पृक्तौ नित्यसम्बन्धावित्यर्थः। नित्यसम्बन्धयोः शब्दार्थयोरुपमानत्वेनोपादानात् ' नित्यः शब्दार्थसम्बन्धः ' इति मीमांसकाः । तदुक्तं भर्तृहरिणा वाक्यपदीये –

'अर्थप्रवृत्तितत्त्वानां शब्दा एव निबन्धनम्।
तत्त्वावबोधः शब्दानां नास्ति व्याकरणादृते' ।। [15]

शब्दश्रवणादनन्तरमर्थावबोधो जायते । अर्थबोधं प्रति शब्द एव कारणम् । अतः उभयोर्मध्ये कश्चन सम्बन्धः स्यादिति। स सम्बन्धो नित्यो महर्षिणा जैमिनिनाङ्गीकृतः - 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः।'[16] सूत्रस्यास्य व्याख्यायां भाष्यकाराः शब्दार्थयोः नित्यसम्बन्धमङ्गीचक्रुः। अत्र औत्पत्तिकशब्दस्य नित्यः इत्यर्थः। तथाहि शवरस्वामिना

---

13 नाट्यशास्त्रम् (सम्पा.) सुरेशवन्द्योपाध्यायः, पञ्चदशोऽध्यायः, सू-३, पृ-१२६

14 रघुवंशम् (सम्पा.) उदयचन्द्रवन्द्योपाध्यायः, प्रथमः सर्गः, पृ-३

15 वाक्यपदीयम्, (सम्पा.) वामदेवाचार्यः, कृष्णदास अकादेमी वाराणसी-१९८७, पृ २१

16 मीमांसासूत्रम् (५/१/१)

भाषितम् '–औत्पत्तिक इति नित्यं ब्रूमः । उत्पत्तिर्हि भाव उच्यते लक्षणया। अवियुक्तः शब्दार्थयोर्भावः सम्बन्धो नोत्पन्नयोः पश्चात् सम्बन्धः'।

## **शब्दार्थव्यापारः-**

यदि कारणं स्यात्तर्हि वर्तेत कश्चन व्यापारोऽपि । भारतीयाचार्य्या व्यापारमिमं वृत्तिनाम्ना अभिहितवन्तः । वृत्तिः शक्तिरिति अर्थान्तरम्। परं शक्तिं वृत्तिं वा विहाय शब्दोऽर्थं बोधयितुं नालम्। शक्त्यैव शब्दः प्रद्योतयति स्वाभीष्टमर्थम् । शक्त्यभावे घोरे प्रयत्नेऽपि शब्दार्थप्रतीतिर्नैव स्यात्। तदुक्तं भर्तृहरिणा–

"विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाशते।
न सत्तयैव तेऽर्थानामगृहीताः प्रकाशकाः।।"[17] इति।

केवलं प्राप्तविषयाः शब्दा एवार्थबोधने क्षमाः। तथाहि पतञ्जलिना भाषितम् – 'शब्द उपलब्धोऽर्थं प्रत्याययति न सत्तामात्रेण'[18] इति। परं का नाम शक्तिरिति जिज्ञासायामाह नागेशः– "शब्दार्थयोस्तादात्म्यमेव शक्तिः"[19] इति।

यद्व्यापारद्वारा वाचकादीनां वाच्यादर्थबोधनं सम्भवति सैव वृत्तिः। 'शाब्दबोधहेतुपदार्थोप-स्थित्यनुकूलपदपदार्थयोः सम्बन्धो वृत्तिरि[20]'ति गङ्गेशोपाध्यायाः। शक्तिर्हि वृत्तेः पर्यायवाचिका। अस्या लक्षणं क्रियते– 'इदं पदमिममर्थं बोधयेत्', 'अस्मात् शब्दादयमर्थो बोद्धव्यः' चेत्येवं प्रकारः सङ्केतः खलु शक्तिः। सा चा वाच्यवाचकरूपा ।

---

17 वाक्यपदीयम् (विष्णुपदभट्टाचार्यसम्पादितम्) (ब्रह्मकाण्डः- ५६)

18 महाभाष्यम्

19 परमलघुमञ्जूषा

20 तत्त्वचिन्तामणिः, शब्दखण्डः

## वृत्तिभेदाः-

केषाञ्चिन्मते वृत्तिरियं चतुष्प्रकारका १) अभिधा २) लक्षणा ३) व्यञ्जना ४) तात्पर्य्याख्या चेति। अभिधा लक्षणा चेति वृत्तिद्वयं नैयायिकाचार्यैः स्वीकृतम्। तेषां मते अभिधायाः लक्षणायाः चातिरिक्तो योऽर्थोऽस्ति, सः अनुमितिरिति । अनुमित्या सोऽर्थः समुपलभ्यते । अतः व्यञ्जनावृत्तेः स्वीकारः अनावश्यकः । नैयायिकैः व्यञ्जनावृत्तेः खण्डनार्थं टीकाः आलिखिताः । तत्र नव्यनैयायिकेन महिमभट्टेन प्रणीतः व्यक्तिविवेकस्तथा च माधवतर्कसिद्धान्तेन प्रणीतः 'शक्तिवादः' उल्लेखयोग्यौ आस्ताम् । गदाधरभट्टाचार्यः व्यञ्जनावृत्तिं नैव स्वीकरोति । तेन प्रणीते शक्तिवादाख्ये ग्रन्थे शव्दशक्तिः प्रोक्ता – 'वृत्तिश्च द्विविधा - शक्तिर्लक्षणा च' ।[21]

वैदान्तिकेषु वृत्तिर्विषये द्विविधं मतमस्ति । वेदान्तपरिभाषायाः प्रणेता 'धर्म्मराजाध्वरीन्द्रः' । तन्मते वृत्तिः द्विधा विभक्ता – अभिधा लक्षणा चेति । अतः तेनैव कथितम् – 'पदार्थश्च द्विविधः – शक्यो लक्ष्यश्चेति' ।[22] केचन वैदान्तिकाः वृत्तिर्विषये मीमांसकानुसारिणः। तेषां नये अभिधा लक्षणा गौणी चेति तिस्रः वृत्तयः। लक्षणायाः गौणीवृत्तेः पृथक्त्वान्मधुसूदनसरस्वती तस्य वेदान्तकल्पलतिकायां विस्तरेण विवृणोति । उक्तञ्च – 'जघन्यापि द्विविधा- लक्षणा गौणी च। गौण्यास्तु वृत्तिद्वयात्मकत्वान्न लक्षणायामन्तर्भावः तस्माल्लक्षणादतिरिक्तैव वृत्तिर्गैणीति चतुरस्रम्' ।[23] वैदान्तिकैः व्यञ्जनावृत्तिः पृथक्तया न स्वीकृता । तात्पर्याख्यसम्बन्धविषये नैयायिकाः वैयाकरणानां मतं स्वीकुर्वन्ति। यद्यपि अर्थापत्तिः तैः वृत्तिरूपेण नाभिहिता ।

---

21 शक्तिवादः (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-१९)

22 वेदान्तपरिभाषा (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-२१)

23 वेदान्तकल्पलतिका (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-२५)

वैयाकरणेषु वृत्तिर्विषये द्विविधं मतं परिलक्ष्यते । परन्तु नागेशभट्टाचार्येण व्यञ्जनायाः अस्तित्वं स्वीकृत्य स्वकीयमतस्य संस्थापनार्थाय प्राचीनवैयाकरणानां मतम् उद्धृतम् । तथोक्तं – 'अतएव निपातानां द्योतकत्वामाकर उक्तम् । स्फोटस्य च व्यङ्ग्यता हर्य्यादिभिरुक्तैव । द्योतकत्वञ्च समभिव्याहृतपदशक्तिव्यञ्जकत्वमेवेति वैयाकरणानामप्येतत्स्वीकार आवश्यकः' ।[24]

आलङ्कारिकेषु वृत्तीनां स्वरूपं पर्यालोचितम् । तेषु आलंकारिकेषु धनिकाचार्यैण तस्य 'काव्यनिर्णयाख्ये' ग्रन्थे व्यञ्जनाया अस्तित्वं नाङ्गीक्रियते । तन्मते रसाभिव्यञ्जकविषये याश्च विषयाः सन्ति ते अभिधा-लक्षणयोरतिरिक्ततया तात्पर्य्यवृत्या रसमुत्पादयन्ति । तन्नये तात्पर्यवृत्तेः सीमा न निर्दिष्टा । प्रयोजने सति तात्पर्यवृत्तिः अर्थान्तरं प्रकाशयति । काव्यनिर्णये ग्रन्थे उक्तम् - 'यावत् कार्य्यप्रसारित्वात् तात्पर्य्यं न तुलाधृतम्' ।[25]

**<u>नैयायिकानां मतम् शाब्दवोधेः-</u>**

प्राचीननैयायिकानां मतिषु ज्ञायमानं पदमेव वाक्यार्थज्ञानस्य करणम् । पुनः नव्यनैयायिकानां मते वाक्यार्थज्ञानस्य करणं पदज्ञानम् । अतः कथितम् –

'पदज्ञानन्तु करणं, द्वारन्तत्र पदार्थधीः ।
शाब्दवोधः फलं तत्र शक्तिधीः सहकारिणी।।[26]

'पदज्ञानं करणं, पदजन्यपदार्थस्मरणं व्यापारः। वृत्तिश्च शक्तिसक्षणान्यतरसम्वन्धः। आकाङ्खा-योग्यता-आसत्तिरूपाणि तात्पर्य्यज्ञानानि सहकारीणि, फलं शाब्दबोधः' ।[27] नव्यन्यायस्य ग्रन्थेषु तात्पर्यम् आसत्त्यादिवत् वाक्यार्थनिर्णयस्य सहायकत्वेन विवेच्यते, न तु

24 वैयाकरणसिद्धान्तमञ्जुषा (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-२५)

25 काव्यनिर्णयः (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-२७)

26 भाषापरिच्छेदः (अनामिकारायचौधुरी-सम्पादितः), पृष्ठा - २३५

27 तर्कामृतम् (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-११)

वृत्तिरूपेण। अतः कथितम् – 'आसत्तिर्योग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते'।[28] सिद्धान्तमुक्तावल्यां टीकायाम् आटीकितम् – 'आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानतात्पर्य्यज्ञानञ्च शाब्दबोधे करणम्'।[29] साहित्यदर्पणे अभिहितान्वयवादिभिः तात्पर्याख्यं वृत्तिरूपेण स्वीकृतम्। तथाहि – 'अभिहितान्वयवादिभिरङ्गीकृता तात्पर्य्याख्या वृत्तिरपि संसर्गमात्रे परिक्षीणो न व्यङ्ग्यबोधिनी'।[30]

**<u>संकेतग्रहस्याष्टसाधनानिः-</u>**

यावत् कालं वृत्ति ज्ञानं न स्यात् तावत् शाब्दबोधो न जायते इति नागेशभट्टस्य कथनं वर्तते। यथा –

"अत एव नागृहीत वृत्तिकस्य शाब्दबोधः" परमलुमञ्जूषा ध्वनिना सह वस्तोः सम्बन्धज्ञानं कस्य शब्दस्य कोऽर्थः इति ज्ञानं वृत्तिज्ञानं, शक्तिज्ञानं, शक्तिग्रहः अथवा संकेतग्रह पदेनोच्यते। अस्मात् कारणात् शब्दादर्थबोधो भवति। न्यायमुक्तावल्यां शक्तिशब्दं परिभाषयन्नाह श्रीविश्वनाथपञ्चाननः पदेन सह पदार्थस्य सम्बन्धः शक्तिरस्ति यया उच्चारितः शब्दः अर्थवान् भवति। यथा –

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः।
स चाऽस्माच्छब्दादयमर्थो बोध्यव्य इति।।[31]

---

28 भाषापरिच्छेदः, कारिका- ८२

29 सिद्धान्तमुक्तावली (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-१२)

30 साहित्यदर्पणः (विमलकान्तमुखोपाध्यायसम्पादितः), पञ्चमः परिच्छेदः, पृ-२२३

31 न्यायसिद्धान्तमुक्तावली- शब्दखण्ड।

प्राचीनो नैयायिकः पदपदार्थयोरिमं सम्बन्धं ईश्वरेच्छारूपं स्वीकरोति। संकेतग्रहस्य विषये स्वाभाविकः प्रश्नो भवति केन साधनेन इदं ज्ञायते यदस्य शब्दस्यायं अर्थोऽस्ति। अस्मिन् विषये एका कारिका वर्तते। यस्यां अष्टौ संकेतग्रस्य साधनानि विद्यते –

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।[32]

पदार्थज्ञानविषये प्राचीननैयायिकाः कथयन्ति यद्वाक्यस्योच्चारणव्यतिरेकेनापि वाक्यार्थस्य प्रतीतिर्भवेत् । केवलमात्रम् इन्द्रियार्थ-सन्निकर्षादर्थज्ञानं लभ्यते, न तु शब्दोच्चारणेन। महर्षिगौतमेन प्रोक्तं – 'इन्द्रियार्थ-सन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्' ।[33] अर्थात् इन्द्रियेन सह विषयस्य प्रात्यक्षिकसंयोगवशाद् अर्थज्ञानं जायते। वात्स्यायनभाष्येऽपि विषयोऽयं युक्त्या प्रदर्शितः – 'तदेवमर्थज्ञानकाले स न समाख्याशब्दो व्याप्रियते, व्यवहारकाले तु व्याप्रियते । तस्मादशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नमिति' ।[34]

**<u>अभिहितान्वयवादः-</u>**

वादोऽयं कुमारिलभट्टेन स्फुटितः। "अभिहितानां पदार्थानां अन्वयः अभिहितान्वयवादः" इति जयन्तभट्टः न्यायमञ्जर्याम्। ये अर्थाः शब्दैरनुज्ञाताः तेषां परस्परोऽन्वयः। अत्राभिप्रायो वर्तते सर्वप्रथमं पदैः तेषामर्थः प्रतीयते अनन्तरं पदार्थानां तेषां परस्परान्वये वक्तुरिच्छाऽनुकूलः तात्पर्यार्थः प्रतीयते यो हि वाक्यार्थो भवति। तस्मात् वाक्यार्थबोधाय अभिहितपदार्थानां अन्वयात् सिद्धान्तोऽयं अभिहितान्वयो विद्यते। अस्मिन् मते पदार्थानां परस्परः सम्बन्धः वक्तुः तात्पर्यानुसारं विज्ञायते। वादेऽस्मिन् सर्वप्रथमं पदैः अनन्वितः पदार्थः प्रकटितो भवति। पुनः आकाङ्क्षादिभिः तात्पर्याख्याशक्त्या पदार्थानं

---

32 न्यायसिद्धान्तमुक्तावली- शब्दखण्ड।

33 न्यायसूत्रम् (१।१।४)

34 वात्स्यायनभाष्यम् (१।१।४)

परस्परसम्बन्धात्मकः वाक्यार्थो बुध्यते। पदार्थज्ञानादेव वाक्यार्थज्ञानं भवति। पदार्थज्ञानं विना वाक्यज्ञानं न कुत्रापि श्रूयते न वा दृश्यते। पदार्थानां ज्ञानं विना 'गाम् आनय' इत्यत्र पदद्वयस्य पृथगर्थचिन्तनं न सिद्ध्यति। ज्ञानाभावे व्यवहारो दुरूहः भ्रष्टश्च स्यात्। तस्मात् अभिहितान्वयेऽस्माकं मतिः।

**अन्विताभिधानवादः-**

मीमांसकानां शाब्दबोधविषयको द्वितीयो वादस्तावद् अन्विताभिधानवादाख्यः । अस्य मतस्य समर्थकः प्रभाकरस्तथा तदनुयायिनः शालिकनाथमिश्रादयश्च वर्तन्ते । प्रभाकरमते कुमारिलभट्टस्य मतानुसारं पूर्वं पदार्था उपस्थिता भवन्ति तदनन्तरं तेषामन्वयो जायते इति यः सिद्धान्तः, स न ज्यायान् । प्रत्युत पूर्वत एव अन्वितानां पदार्थानाम् अभिधया वृत्त्या बोधनं जायते इति कृत्वा सिद्धान्तोऽयम् अन्विताभिधानवादनाम्ना कथ्यते । तन्मते पदार्थानाम् अन्वयः पूर्वत एव सिद्धत्वात् तत्र तात्पर्याख्या शक्तिर्नापेक्षिता । अस्मिन् वादे न तात्पर्यं गृह्यते, न वा तदुत्थापिका तात्पर्याख्या शक्तिः स्वीक्रियते । प्रभाकरः स्वं मतं समर्थयितुं युक्तिमेकां समुस्थापितवान् । पदेभ्यः संकेतग्रहानन्तरं पदार्थः गृह्यते । संकेतस्य ग्रहणं व्यवहाराज्जायते । यथा कश्चन अबोधो बालः पदपदार्थज्ञानरहितः सन् पितुः समक्षं तिष्ठति । पिता तत्रस्थमेव स्वज्येष्ठपुत्रं पिपासया 'जलमानय' इति कथनादनन्तरं सः ज्येष्ठः तदानेतुं गच्छति । किन्तु सः अबोधः शिशुः न 'जलं' जानाति न वा 'आनय' पदार्थमेव । स तत्रस्थं स्वज्येष्ठं भ्रातरं पितुः कार्यं साधयन्तं पश्यति । कालान्तरेण स पश्यति यत् ज्येष्ठः पित्रे जलं ददाति इति हेतोः तस्य शिशोः संस्कारः किञ्चित् वर्धते । कालेन स पिता पुनः ज्येष्ठपुत्रमादिदेश – 'लेखनीमानय' इति । शिशुः इदानीमपि किञ्चिन्न जानीते किन्तु अधुना तस्य पुरः पूर्वं श्रुतस्य 'आनय' इति पदस्य आवृत्तिर्जाता, यतो हि पूर्वं स 'जलमानय' इति वाक्ये 'आनय' इति पदं श्रुतवान् । अधुना ज्येष्ठः पुत्रः लेखनीं ददाति । एतेन स शिशुः पूर्णरूपेण ज्ञातवान् यत् 'आनय' नाम आहरणरूपा क्रिया, जलपदार्थश्च पयः, 'लेखनी'

इत्यस्यार्थः लेखनसहायकवस्तु। शिक्षणस्य अयं प्रकारः 'आवापोद्वापक्रिया' नाम्नाऽपि ज्ञायते । इत्थं व्यवहारेण संकेतग्रहो जायते । अत एव यदा अनन्विते पदार्थे संकेतग्रहो न जायते, तदा केवलम् अनन्वितस्य पदार्थस्य उपस्थितिरपि न स्यात्। इत्थम् अन्वितानामेव पदार्थानाम् अभिधानात् अभिधाशक्त्या वा 'अन्विताभिधानवाद' इति सिद्धान्तः । अतः बृहतीति ग्रन्थे विषयेऽस्मिन् निगदितम्- 'पदार्थास्तावन्नाव्यतिरिक्ताः क्वचिदुपलभ्यन्ते, अन्ततोऽस्त्यर्थेन' ।[35]

**तात्पर्यवृत्तिस्वरूपम्-**

नैके आचार्य्या यद्यपि अभिधालक्षणयोरस्तित्वं समर्थितवन्तः, परं व्यञ्जनावृत्तिग्रहणे तेषु मतानैक्यं दृक्पथमायाति । दर्पणकृतोक्तम् – 'तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने'[36]। अर्थात् अभिधया एकैकपदार्थबोधनविरमाद् वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्य्यं नाम वृत्तिः। भाषापरिच्छेदे भणितम् – 'वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्' । परं तात्पर्यवृत्तिविषयेऽपि ते विवदन्ते। तात्पर्यविषयेऽपि अलंकारनिकाये द्वौ पक्षौ आस्ताम् - १) अभिहितान्वयवादः २) अन्विताभिधानवादश्चेति ।

तत्र अभिहितान्वयवादिनां मते वाक्यस्थितं प्रतिपदम् उच्चारणादनन्तरं स्वस्वार्थान् सम्प्राप्य समस्तपदानाम् अर्थसमूहानां परस्परान्वयं कृत्वा वाक्यार्थबोधो भवति । दुर्गाप्रसादरचितायां साहित्यदर्पणटिप्पन्यां निगदितम् – "अभिहितानां स्वस्ववृत्त्या पदैरुपस्थापितानामर्थानामन्वय इति ये वदन्ति तेऽभिहितान्वयवादिनः"।[37] वस्तुतस्तु अभिहितान्वयवादस्य प्रथमः समर्थकस्तावन्महर्षिः जैमिनिः। तेन विरचितो सूत्रग्रन्थो जैमिनिसूत्रनाम्ना प्रसिद्धः। तत्र 'तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य'[38] इति सूत्रेण

---

35 बृहती (निर्णयसागर), पृष्ठा – ३८३ (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-१७)

36 साहित्यदर्पणः हरिदाससिद्धान्तवागीशसम्पादितः (द्वितीयः परिच्छेदः)

37 साहित्यदर्पणटिप्पनी ( छाया) (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-८)

38 जैमिनिसूत्रम् (१।१।२५ )

'अर्थस्य तन्निमित्तत्वात्' इत्युक्त्वा स्फुटितं यद् वाक्यार्थप्रतीतेः कारणम् अर्थः पदार्थो वेति। सूत्रमिदमाश्रित्य भाविकाले अभिहितान्वयवाद-अन्विताभिधानवादौ द्वौ पन्थानौ जायेते । शवरस्वामी जैमिनीयसूत्रस्य शावरभाष्ये भाषितम् – "पदानि हि स्वं स्वमर्थमभिधाय निवृत्तव्यापाराणि, अथेदानीं पदार्था अवगताः सन्त वाक्यार्थं गमयन्ति" ।[39]

आचार्य्यस्य कुमारिलभट्टस्यानुयायिणः मीमांसकाः अभिहितान्वयवादस्य समर्थका आसन् । इतोऽपि प्राचीनन्यायवैशेषिकाः अभिहितान्वयवादिरूपेण प्रख्याताः । पण्डितप्रवरेण रामचरणतर्कवागीशेन साहित्यदर्पणविवृत्याम् 'अभिहितान्वयवादिनाम्' इति पदव्याख्यायां प्राचीननैयायिकानां मतमङ्गीकुर्वता अभिहितान्वयवादिरूपेण प्रख्यापितम् । तथा च आह – "अभिहितानामभिधया लक्षणया वा पदोपस्थापितानामन्वयवोधवादिनां प्राचीननैयायिकानामित्यर्थः" ।[40] काश्मीरीयनैयायिकेन जयन्तभट्टेन प्रणीते 'न्यायमञ्जरीति' ग्रन्थे आलिखितं यन्नैवासन् नैयायिकाः अभिहितान्वयान्विताभिधानवादपक्षपातिनः । समाम्नातपूर्वं मतमेकं प्रचलदासीत्। आचार्य्योऽयं प्राचीनकारिकया मतमिदं प्रदर्शितवान् । तदुक्तं तेन- 'मतद्वयमपीदन्तु नास्मभ्यं रोचतेतराम् कुतोऽन्विताभिधानं वा कुतो वाभिहितान्वयः' ।[41] मधुसूदनसरस्वती तदीयायां वेदान्तकल्पलतिकायां स्पष्टरूपेण प्रतिपादितवान् यत् अभिहितान्वय-अन्विताभिधानवादयोः न हि समर्थकाः प्राचीननैयायिकाः। अतो मतद्वयं मीमांसकानाम् । शब्दस्यार्थप्रतीतिजननसामर्थ्यरूपः सम्बन्धो मुख्यया वृत्त्या अङ्गीकरणीयः । इतरपक्षे प्राचीननैयायिकानां मतानुसारम् ईश्वरेच्छारूपं संकेतमेव मुख्यया वृत्तिरूपेण गण्यते । ते प्राचीनाः नैयायिकाः ब्रुमः – तथाहि पदवृत्तिस्तावद् द्वेधा मुख्या जघन्या च । तत्र मुख्या सामान्यविशिष्टव्यक्तिविषयास्माच्छब्दादयमर्थो बोध्यव्य इतीश्वरेच्छारूपसंकेत इति

39 शाबरभाष्यम् (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-१५)

40 साहित्यदर्पणः (सम्पा.) विमलाकान्तमुखोपाध्याय, द्वितीयः परिच्छेदः, पृ-५२

41 न्यायमञ्जरी (चोखाम्वा), प्रमाणप्रकरणम्, पृ-३७०

तार्किकाः । सामान्यमात्रविषयः स्वाभाविक एवार्थप्रीतिजननसामर्थ्यलक्षणः सम्बन्ध इति मीमांसकाः।[42] मधुसूदनसरस्वती तस्य 'अद्वैतसिद्धिः' नामके ग्रन्थेऽपि पूर्वोक्तमतमुल्लिखितवान् – 'तार्किकमतस्योभयपक्षवहिर्भावादिकन्तु वेदान्तकल्पलतिकायां व्युत्पादितमित्युपरम्यते' ।[43]

अभिहितान्वयवादिनां मते पदार्थज्ञानं तु वाक्यार्थज्ञानस्य करणम् । किन्तु प्राचीननैयायिकानां मतिषु ज्ञायमानं पदमेव वाक्यार्थज्ञानस्य करणम् । पुनः नव्यनैयायिकानां मते वाक्यार्थज्ञानस्य करणं पदज्ञानम् । अतः कथितम् – 'पदज्ञानन्तु करणं, द्वारन्तत्र पदार्थधीः' ।[44] 'पदज्ञानं करणं, पदार्थोपस्थितिर्व्यापारः, आकाङ्खा-योग्यता-आसत्तिरूपाणि तात्पर्य्यज्ञानानि सहकारीणि, फलं शाब्दबोधः' ।[45] नव्यन्यायस्य ग्रन्थेषु तात्पर्यम् आसत्त्यादिवत् वाक्यार्थनिर्णयस्य सहायकत्वेन विवेच्यते, न तु वृत्तिरूपेण। अतः कथितम् – 'आसत्तिर्योग्यताकाङ्क्षातात्पर्य्यज्ञानमिष्यते' ।[46] सिद्धान्तमुक्तावल्यां टीकायाम् आटीकितम् – 'आसत्तिज्ञानं योग्यताज्ञानमाकाङ्क्षाज्ञानतात्पर्य्यज्ञानञ्च शाब्दबोधे करणम्' ।[47] साहित्यदर्पणे अभिहितान्वयवादिभिः तात्पर्याख्यं वृत्तिरूपेण स्वीकृतम्। तथाहि – 'अभिहितान्वयवादिभिरङ्गीकृता तात्पर्य्याख्या वृत्तिरपि संसर्गमात्रे परिक्षीणो न व्यङ्ग्यबोधिनी' ।[48]

---

42 वेदान्तकल्पलतिका (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-१०)

43 अद्वैतसिद्धिः, निर्णयसागर, (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ – ७०५)

44 भाषापरिच्छेदः (अनामिकारायचौधुरी-सम्पादितः), पृष्ठा - २३५

45 तर्कामृतम् (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-११)

46 भाषापरिच्छेदः, कारिका- ८२

47 सिद्धान्तमुक्तावली (शब्दार्थतत्त्व, सम्पा- श्रीरवीन्द्रकुमार भट्टाचार्य्य, पृ-१२)

48 साहित्यदर्पणः (विमलकान्तमुखोपाध्यायसम्पादितः), पञ्चमः परिच्छेदः, पृ-२२३

**शब्दोत्पत्तिप्रक्रिया-**

भारतवर्षे वैयाकरणानां सुदीर्घा परम्परा परिलक्षिता । तत्र गार्ग्यः, काश्यपः, स्फोटायनः, औदुम्वरायणः, शाकटायणश्चेति प्रसिद्धाः वैयाकरणाः। पाणिनिना प्रसङ्गानुसारं स्थलेषु प्राचीनानाम् उद्धृतिः प्रदीयते। पाणिन्युत्तरकाले पतञ्जलिः एव प्रथमः वैयाकरणः, यः पूर्ववर्तिनां शिक्षा-निरुक्त-व्याकरणशास्त्रगतानां युक्तीनामेकत्र समन्वयं साधयित्वा स्वातन्त्रं वैज्ञानिकव्याख्यानं प्रस्तौति। 'श्रूयमाणवर्णेषु.....' इति नयो यद्यपि आनन्दवर्धनाचार्यस्य मतप्रेक्षितः, परन्तु अस्य प्रथम उद्गाता तावत् स्फोटायनमुनिः । आदौ पतञ्जलिना स्फोटस्य व्यवहारं प्रदर्श्य पूर्वपरम्परा निर्दिष्टा। परम् अस्य सिद्धान्तस्य पूर्णं व्याख्यानं भर्तृहरिणा वाक्यपदीये ग्रन्थे कृतम्।

"श्रूयमानवर्णेषु....." इति प्रक्रियायाः अङ्गद्वयं वरीवर्ति। प्रथमतः, श्रूयमाणवर्णो नाम वाचः समुत्पत्तिः, द्वितीयश्च वाचः श्रोत्रा ग्रहणमिति । शब्दोत्पत्तिविषये भर्तृहरेः पूर्वाचार्यैः वाचः चातुर्विध्यम् अङ्गीक्रियते। ताश्च वाचस्तावत् – क. परा ख. पश्यन्ती ग. मध्यमा घ. वैखरीति। तत्र परास्थितिः वक्तुः इच्छासम्वन्धिता।

परास्थित्याम् उत्पन्नाया इच्छायाः विश्लेषणात्परं पश्यन्त्यावस्थां सम्प्राप्य शब्दरूपं निश्चितं भवति। पश्यन्ती नाम मननावस्थेति। विश्लेषणात्मकं कार्यं तैजस्तत्त्वेन संघट्यते - "स मनोभावमापद्य तेजसा पाकमागतः"।[49] पश्यन्त्यवस्थायां प्राणवाय्व्योः संयोगो भवति। इयञ्च प्रयत्नावस्थेति। उच्चारणावयवस्य च श्वासस्य सर्वाः प्रक्रियाः अस्यामवस्थायां सम्पन्नाः जाताः। अस्यामवस्थायां विनिश्चितशब्दानुसारम् उच्चारणावयव-प्रश्वासयोः अवरोधादिप्रयत्नो भवति।वैखरी वाक् नाम विश्वस्य पारस्परिकव्यवहारहेतुभूतेति।

---

49 भाषातत्त्व ओर वाक्यपदीय, ड. सत्यकाम वर्मा पृ-४७

वाचः उपर्युक्तास्ववस्थासु भर्तृहरिणा पश्यन्ती, मध्यमा च वैखरीति एतेषां ग्रहणं भवति। व्याकरणे पश्यन्त्याः वाचः प्रभावोऽधिकः। इह व्याकरणक्षेत्रे अर्थभावनया सह शब्दो हि बुद्धिस्थः। प्रकृति-प्रत्ययविश्लेषणमपि पश्यन्त्यावस्थायां संघटते - "तद्वच्छब्दोऽपि बुद्धिस्थः श्रुतीनां कारणं पृथक्"।[50] "वितर्कितः पुरा बुद्धया क्वचिदर्थे निवेशितः"।[51]

परावस्थायां व्याकरणस्य गतिर्नास्ति। भर्तृहरिणा तस्माद् वाचः त्रिविधा अवस्था स्वीकृता – पश्यन्ती मध्यमा वैखरी चेति। इयं वैखरी वाक् श्रोतुः कर्णपर्यन्तं गच्छति। शब्दग्रहणस्य प्रक्रिया उत्पत्तेः प्रक्रियातो विलक्षणा। ग्रहणप्रक्रियायां स्तरचतुष्टयम् : नादः - स्फोटः - ध्वनिः (व्यक्तिः) - स्वरूपञ्च। स्वरूपात् तात्पर्यं जायते ।

**नादः -**

व्यक्ता वर्णध्वनयः नादरूपेण श्रोतुः समीपे समागच्छन्ति। व्यक्तध्वनिः वायौ तरङ्गन्यायेन प्रसरति। तरङ्गस्य विशेषत्वं सदा व्यक्तशब्दानुरूपम्। अर्थात् दीर्घ-ह्रस्वोच्चारितवर्णानुसारं तरङ्गमिदं दीर्घत्वं प्राप्तोति । तरङ्गं कर्णपटहे आघातं प्राप्य वर्णान् पुनरुत्पादयति। पुनः समुत्पादितवर्ण एव नादरूपेण परिचीयते। इत्थं प्रत्येकं उच्चारितानां वर्णानां तरङ्गेन नादः जायते। यतो हि सर्वे उच्चारितवर्णानां तरङ्गानि समभावेन कर्णकुहरं न गच्छन्ति। उच्चारणविधेः क्रमानुसारेण गच्छन्ति तरङ्गानि। अतः नादः क्रमजन्मा भवति। तस्माद्भर्तृहरिः कथयति –

"नादस्य क्रमजन्मत्वात् न पूर्वो न परश्च सः।

---

50 वाक्यपदीयम् (१.४६)

51 तत्रैव(१.४७)

अक्रमः क्रमरूपेण भेदवानिव जायते"।।[52]

परन्तु प्रश्नो जायते यदि उच्चारितानां वर्णानां तरङ्गानि क्रमेण नादम् उत्पादयन्ति, तर्हि कथंकारं शब्दस्य पूर्णताज्ञानं भवति। श्रूयमाणे पदे वर्णाः क्रमभावेन श्रूयमाणाः क्रमभावेन विलीयमानाः क्षणिका भवन्ति। एवम् अन्तिमवर्णस्योच्चारणावसरे तत्पूर्वभाविनः अन्ये वर्णाः ध्वंसा भवन्ति। इत्थं प-अ-ट-अ इत्येवंरूपैः श्रूयमाणवर्णैः स्फोटाख्यो नित्यः अखण्डः आन्तरः शब्दः अभिव्यज्यते। स एव स्फोटः।

## <u>स्फोटः -</u>

श्रूयमाणवर्णाः स्फोटाभिव्यञ्जका इत्युक्तम्। ननु कीदृशोऽयं स्फोटपदार्थ इति। नित्यः अखण्डः स्फोटः सर्वगतः सन् वक्तुरन्तरे यथा वर्तते तथैव श्रोतुरपि। एवंक्रमेण वक्तुर्हृदये वर्तमानोऽयं स्फोटः कदाचित् श्रूयमाणवर्णैः बहिः प्रकाश्यते। स एव श्रूयमाणवर्णाः श्रोत्रा श्रुताः श्रोतृहृद्गतं स्फोटम् अभिव्यञ्जयन्ति। तदुक्तं हरिकारिकायाम् –

"द्वावुपादानशब्देषु शब्दौ शब्दविदो विदुः।

एको निमित्तं शब्दानामपरोऽर्थे प्रयुज्यते"[53]।।

स्फोटवादिनां धारणामनुसृत्य यस्य कस्यापि शब्दस्य अर्थावबोधः स्फोटेनैव संघटते। अर्थात् पूर्व-पूर्ववर्णस्य संस्काराः ( गौः इत्यत्र 'ग्' इत्यस्य संस्कारः, 'औ' इत्यस्य संस्कारः) च अन्तिमेन विसर्गरूपेण संस्कारेण सह संयुज्य शब्दस्य पूर्णतायाः प्रतीत्या अर्थप्रतीतिं साधयन्ति। इयं पूर्णतायाः प्रतीतिर्हि स्फोटः। भर्तृहरिणा स्फोटे शब्दार्थयोः पूर्णतायाः समकालिकानुभूतिः अङ्गीक्रियते। वाक्यस्य पूर्णतायाः प्रतीतिः वाक्यस्फोटः। वाक्यपूर्णतयैव वाक्यार्थप्रतीतिः सम्भवति। इत्थं पद-वर्णस्फोटौ स्वीक्रियेते ।

---

52 वाक्यपदीयम्, (ब्रह्मकाण्डः), (सम्पा. विष्णुपद भट्टाचार्य्य), श्लोकः-४८, पृ-१२२

53 वाक्यपदीयम् (१.४४)

**व्यङ्ग्य-व्यञ्जकभावः -**

भर्तृहरिणा नादस्फोटयोः मध्ये व्यङ्ग्य-व्यञ्जकभावौ कथितौ - "व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोट-नादयोः"।[54] नाद एव व्यञ्जकः, स्फोटः व्यङ्ग्य च। नाद-स्फोटयोर्मध्ये नित्यः स्वाभाविकश्च सम्बन्धः । नादाभावात् स्फोटस्य अस्तित्वं न सम्भवम्। स्फोट एव शब्दस्य पूर्णतां प्राप्तुमर्हति। श्रुतिः पूर्णतामेति अर्थप्रतीतिरपि भवति यत्र तात्कालिकी उपलब्धिर्हि स्फोटः। आनन्दाचार्येण प्रतिपादितस्य व्यङ्ग्यार्थस्य आधार एव स्फोटः।

आनन्दाचार्येण ध्वनिशब्दस्य प्रयोगोऽपि वैयाकरणानां मतानुसारिभिः कृतः। नादस्य कारणभूतान् वर्णान् वैयाकरणो ध्वनिरूपेण व्यपदिशति। पुनः नादः व्यञ्जक एव च। प्रसङ्गेऽस्मिन् व्युत्पत्तिरेव - "ध्वनति यः स व्यञ्जकः शब्दो ध्वनिः"।

**ध्वनिः -**

स्फोटादनन्तरम् अर्थविस्तारो भवति। तत् श्रोत्रा गृहीता तृतीयावस्था। भर्तृहरिणा इमं तृतीयावस्था हि ध्वनिः व्यक्तिः वेति नाम्ना कथिता - "कैश्चिद् व्यक्तयः एवाऽस्या ध्वनित्वेन प्रकल्पिताः"।[55] आनन्दवर्धनः प्रतीयमानार्थं ध्वनिसंज्ञया अभिहितवान् - "ध्वन्यते इति ध्वनिः"। प्रतीयमानार्थो व्यञ्जनया प्रतिपादितो भवति। शब्दार्थयोः धर्मोऽयं ध्वननं व्यञ्जकं वेति अभिधीयते – "ध्वन्यते अनेन इति ध्वनिः"।

---

[54] भाषातत्त्व ओर वाक्यपदीय, सत्यकाम-वर्मा, पृ-५४.

[55] भाषातत्त्व ओर वाक्यपदीय, सत्यकाम वर्मा पृ-४७

**व्यञ्जनायाः स्वरूपम्-**

अभिधालक्षणयोः अतिरिक्ता वृत्तिर्व्यञ्जना। तल्लक्षणं यथा-

"विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।

सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च"।।[56]

एवं वाच्यलक्ष्यार्थयोः व्यतिरिक्तः प्रतीयमानार्थद्योतकः शब्दार्थयोश्च व्यापारो व्यञ्जनेति। इयं वृत्तिः काव्यशास्त्रज्ञैः आविष्कृता। वाल्मीकिकालिदासादीनां काव्यं यत् सहृदयान् प्रीणयति, न तद् वाच्यवाचकभावेन लक्ष्यलक्षकभावेन वा। परं प्रतीयमानार्थमहिम्नैव कालिदासादीनां काव्यानि ते आस्वादयन्ति। प्रतीयमानोऽर्थश्च न अभिधया न अपि च लक्षणया प्रत्याय्यः। सहृदयानाम् आस्वादयोग्ये काव्ये वाच्यार्थलक्ष्यार्थयोः अतिरिक्तस्य प्रतीयमानार्थस्य परमाह्लादकरूपेण ग्राह्यत्वाद् अभिधा-लक्षणाभ्यां न निर्वाहः। अत एव यथा वाच्यार्थावगतये अभिधा लक्ष्यार्थबोधार्थञ्च लक्षणा अङ्गीक्रियेते, तथैव प्रतीयमानार्थस्य प्रत्यायनार्थं व्यञ्जना नाम्नी स्वतन्त्रा वृत्तिः काव्यिकैः स्वीक्रियते।

प्रतीयमानार्थस्य प्रत्यायनार्थं व्यञ्जनोपादीयते । अतः कोऽयं प्रतीयमानार्थ इति आदौ ज्ञातव्यम्। शब्दानामर्थः प्राधान्येन द्विविधः – साक्षादभिहितः अनभिहितश्चेति। तत्र साक्षादभिहितोऽर्थो यथा घटपदस्य घटत्वरूपोऽर्थः, पटपदस्य च पटत्वरूपोऽर्थः। अयमर्थो वाच्यः अभिधया बोध्यः। परं साक्षादनभिधेयोऽर्थो व्यङ्ग्यः प्रतीयमानः।[57] अयमर्थश्च व्यञ्जनया वेद्यत इति कृत्वा व्यङ्ग्यः अपि उच्यते। काव्ये चारुत्वं प्रतीयमानेन अर्थेनैव भवति न तु वाच्यार्थेन। यथोक्तम् आनन्दवर्धनाचार्येण-

---

56 साहित्यदर्पणः (द्वितीयः परिच्छेदः)

57 'वस्तुचारुत्वप्रतीतये स्वशब्दानभिधेयत्वेन यत्प्रतिपादयितुमिष्यते तद् व्यङ्ग्यम्'
(पण्डितपट्टाभिरामसम्पादितः आनन्दवर्धन-ध्वन्यालोकः, पृ-४२६)

'अत्यन्तसारभूतत्वाच्चायमर्थो व्यङ्ग्यत्वेनैव दर्शितो न तु वाच्यत्वेन। सारभूतो ह्यर्थः स्वशब्दानभिधेयत्वेन प्रकाशितः सुतरामेव शोभामावहति। प्रसिद्धिश्चेयमस्त्येव विदग्धविद्वत्परिषत्सु यदभिमततरं वस्तु व्यङ्ग्यत्वेन प्रकाश्यते न साक्षाच्छब्दवाच्यत्वेन।' [58]

प्रतीयमानेऽर्थ एव चमत्कारः, न तु वाच्यार्थे । अधोलिखितेन उदाहरणेन विषयः स्पष्टताम् एति -

"कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।

सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्" ।।[59]

अत वाच्य-प्रतीयमानौ द्विविधौ अपि अर्थौ अस्माकं प्रतीतिपथम् अवतरतः। तत्र वाच्योऽर्थो नायिकाया विषयः। प्रतीयमानोऽर्थश्च तद्भर्तृविषयकः।

अयं नायिकाविषयो वाच्यार्थः साक्षाच्छब्देन उक्तः। अयमर्थः अविदग्धानामपि स्फुटः। अस्मिन् अर्थे न किमपि सौन्दर्यम्। परम् अस्मात् पद्याद् वक्तृ-बोद्धव्यमहिम्ना निरन्तरं काव्याभ्यासवशाद् सहृदयैः अपरोऽर्थः आस्वाद्यते। अयमेवार्थः प्रतिपत्तृप्रतिभानुप्राणितः प्रतीयमानः। एवं वक्तृबोद्धव्यादीनाम् उपाधीनां पर्यालोचनया अनवधिः व्यङ्ग्योऽर्थः परिस्फुरति। परं काव्ये वाच्योऽर्थस्तु केवलमुपायमात्र एव। औपाधिकोऽर्थस्तु प्रतीयमान एव। सहृदयाः काव्ये तावदेव वाच्यार्थम् उपाददति, यावद् असौ प्रतीयमानार्थद्योतने सहकारिताम् अवलम्बते। तदवगतौ तेषामास्वादविषयोऽर्थः प्रतीयमान एव। प्रतीयमानार्थस्य स्वरूपमेवं निर्दिष्टमास्ते ध्वन्यालोके -

"प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकविनाम्।

[58] तत्रैव, पृ-५३३

[59] तत्रैव, पृ-७६

यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु।।"[60]

वाच्यात् प्रतीयमानार्थो भिन्नः। पुनः शब्द अत्र वाच्याद् विशेषद्योतकः। तद्यतिरिक्तं सारभूतं च इत्यर्थः। प्रतीयमानं वस्तु महाकवीनां वाणीषु विद्यते, न अन्येषाम्। अयमेव अर्थः अङ्गनासु लावण्यमिव। प्रसिद्धशरीरसौन्दर्यात् स्वतन्त्ररूपेण प्रतीयते अयं प्रतीयमानार्थः। अङ्गनादेहस्य लावण्यं देहाश्रितमपि चाक्षउषप्रत्यक्षगोचरावयवेभ्यः भिन्नतया प्रकाश्यते, तथैव सहृदयानां सकाशे प्रसिद्धऽयम् अर्थः प्रसिद्धालंकारेभ्यः पृथग्रूपेण प्रतीयमानो भवति। यथा अङ्गनानां लावण्यं समस्तावयवेभ्यो भिन्नं निर्वर्ण्यमानं किमपि अन्यदेव, तथैव प्रतीयमानार्थः सहृदयानाम् आलोचनामृतम् तत्त्वान्तरम्।

काव्यस्य सारभूतो हि ध्वनिः। ध्वनेः सद्भावे शब्दार्थौ किमपि अन्यदेव भवति। किमपि अन्यदेव इत्यस्य अर्थः चमत्कारः। शतश अलंकारैः शोभितौ प्रतीयमानार्थरहितौ शब्दार्थौ अकाव्यं भवतीति । प्रतीयमानोऽर्थः न साक्षात्तया अभिधीयते, प्रत्युत अभिव्यज्यते। अतएव रमणीयता तत्र प्रधानम्।

शब्दस्य व्यञ्जकत्वविघटनात् शब्दनैव उक्तोऽयमर्थः अप्रतीयमानः काव्ये न चारुत्वाधायकः। परम् असौ अर्थो यदा शब्देन स्पष्टम् अनुक्त्वा ध्वन्यते, तदा तेन प्रतीयमानार्थेन काव्ये किमपि चारुत्वमधिकं जायते। प्रतीयमानोऽर्थः त्रिविधः- वस्तुरूपः, अलङ्काररूपः, रसरूपश्चेति।

**<u>आलंकारिकाणां मतम्-</u>**

वैयाकरणानां मतानुसारं ध्वनिसिद्धान्ते गृहीता व्यञ्जना (व्यक्तिः) व्यञ्जक-व्यङ्ग्यभावस्य व्यञ्जकत्वस्य चाधारभूतेति। ध्वन्यालोके तृतीये उद्योतेऽपि आनन्दाचार्यः स्वयमेव कथयति- परिनिश्चितनिरपभ्रंशशब्दब्रह्मनां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं

---

60 पण्डितपट्टाभिरामसम्पादितः आनन्दवर्धन-ध्वन्यालोकः, १, ४

ध्वनिव्यवहार इति तैः सह किं विरोधाविरोधौ चिन्त्येते"।[61] आलङ्कारिकैः आनन्दवर्धनप्रभृतिभिः तात्पर्य्यं वृत्तित्वेन न गृह्णन्ति । तन्मतेषु अभिधायाः च लक्षणायाः अगोचरीभूताः सर्वे अर्थाः व्यञ्जनया प्रतीयन्ते । काव्यप्रकाश-साहित्यदर्पणकारयोः मम्मट-विश्वनाथयोर्नये – 'अभिधा-तात्पर्य्य-लक्षणात्मकः व्यापारत्रयातिवर्त्ती ध्वननादिव्यापारोऽनपह्नवनीय एव' ।[62] पुनः–

"वृत्तीनां विश्रान्तेरभिधा-तात्पर्य्य-लक्षणाख्यानाम्।

अङ्गीकार्य्या तुर्य्या वृत्तिर्बोधे रसादीनाम्" ।।[63]

**व्यञ्जनायाः सिद्धिः -**

व्यञ्जनाविषयः अस्माभिः साधारणतो व्याकरणाज्ज्ञायते। परन्तु अस्य साधनम् अतीव कष्टसाध्यम्। व्यञ्जनालब्धस्य प्रतीयमानार्थस्य अस्तित्वसिद्धये आनन्दवर्धनाचार्येण बह्व्यः युक्तयः उपस्थापिताः । व्यञ्जनां विहाय श्रेष्ठं नाम उत्तमकाव्यं (उत्तमोत्तमकाव्यम्-जगन्नाथनये ) न प्रसज्येत ।

वस्तुतस्तु ध्वनिसिद्धान्तस्य आधारभूता तावद् व्यञ्जना। अतः व्यञ्जनायाः सिद्धौ ध्वनिसिद्धिः स्वाभाविकगत्या भवति। व्यञ्जनावृत्तेः विरोधिपक्षस्य मतग्रामं स्वकीयकल्पनाद्वारेण प्रस्तुतीकृत्य आनन्दवर्धनेन तर्कपुरःसरं तन्मतजातं खण्डितम्।

ध्वनिविरोधिनां मतम् आदौ स्थापयित्वा आनन्दवर्धनाचार्यः क्रमेण तन्मतानां खण्डनपूर्वकं वाच्यार्थेनैव ध्वनेः प्रतीतिः वा व्यञ्जनायाः स्थापनं कृतवान्।

आदौ कथितं यत् ध्वनिसिद्धान्तस्य आधारभूतया व्यञ्जनाशक्त्या प्रतिपादितः अर्थस्तावद् व्यङ्ग्य़ार्थः। अतः व्यङ्ग्यार्थस्य अस्तित्वसिद्धिर्हि मम आशय।

61 ध्वन्यालोकः (सम्पा.) आचार्यः विश्वेश्वर, तृ. उ, पृ- २७६

62 काव्यप्रकाशः (पञ्चमः परिच्छेदः)

63 साहित्यदर्पणः, पञ्चमपरिच्छेदः, कारिका-१

अभिधावृत्तिप्रतिपादिताद् वाच्यार्थाद् व्यङ्ग्यार्थ भिन्न इति कृत्वा तस्य साधनं कर्तव्यम्। परन्तु अस्य सिद्धये कस्यचिद् व्यापारस्य वा शक्तेः कल्पना अवश्यकर्तव्या । अतः सर्वप्रथमं वाच्यार्थाद् व्यङ्ग्यार्थस्य भेदः प्रदर्श्यते ।

## वाच्यार्थाद् व्यङ्ग्यार्थस्य भेदयुक्तिः -

आनन्दवर्धनाचार्यः ध्वन्यालोके ग्रन्थे ध्वनेः प्रकारत्रयम् अङ्गीकृतवान् –क) वस्तुध्वनिः ख) आलङ्कारध्वनिः ग) रसध्वनिश्चेति। परं वाच्यध्वनिः वाच्यार्थाद् भिन्नः - "स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रम्, अलङ्काररसादयश्चेत्यनेकः प्रभेदप्रभिन्नो दर्शयिष्यते। सर्वेषु च तेषु प्रकारेषु, तस्य वाच्यादन्यत्वम्। तथा हि आद्यस्तावत् प्रभेदो वाच्याद् दूरं, विभेदवान्..... " I[64]

**प्रथमतः**, कदाचित् वाच्ये विधिरूपे पुनः कदाचित् प्रतीयमानार्थे निषेधरूपः ध्वनितः -

भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन।
गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन।।[65]

प्रियेन सह संकेतस्थाने निर्जनावस्थायाम् प्रेमालापं कुर्वन्ती नायिका पुष्पचयनरतं धार्मिकं दृष्ट्वा अवदत्- हे धार्मिक ! निर्विघ्नेन भ्रमणं कुरु। यस्मात् कुक्कुरात् भवान् विभेति, स गोदावरीतीरस्थेन दृप्तसिंहेन मारितः। अतः निश्चयेन भ्रमणं कुरु । परन्तु विमर्शनादनन्तरं वाच्यसामर्थ्याक्षिप्यः प्रतीयमानार्थः "भ्रमणमास्तु" इति प्रतीयते। अतः वाच्ये विधिरूपे प्रतीयमानार्थो निषेधः प्रतिध्वन्यते इति कृत्वा वाच्यात् प्रतीयमानार्थो भिन्न इति प्रमाणितम् ।

---

64 ध्वन्यालोकः, (सम्पा.) आचार्यः विश्वेश्वर, पृ- १३

65 ध्वन्यालोकः, पृ- १३

**द्वितीयतः**, कदाचित् वाच्ये निषेधरूपे पुनः प्रतीयमानार्थः विधिरूपः -

श्वश्रुरत्र निमज्जति अत्राहं दिवसकं प्रलोकय।
मा पथिक रात्र्यान्धक शय्यायामावयोर्माङ्क्षीः।।[66]

पूर्वरात्रौ सुरतविधौ निजभ्रमेण रात्र्यान्धकेन सह अनर्थविधायिनं कार्यं प्रोषितभर्तृकया संघटितम् । अद्य तु तम् उपपतिं प्रति स्वयं कुलटायाः उक्तिरियम्। अत्र श्वश्रुः निमज्जति, अत्र अस्मिन् पार्श्वे अहम् शेते। दिवसकं सम्यक्तया त्वम् अवलोकय। आवयोः शय्यायां माङ्क्षीः। अनेन वाच्यार्थेन निषेधरूपः अर्थः प्रकटीभवति, परन्तु प्रतीयमानार्थे शय्यायाम् आमन्त्रणात्मको विधिरूपार्थः प्रतीयते ।

**तृतीयतः**. वाच्यार्थे विधिरूपे स्थितेऽपि प्रतीयमानार्थे विधिनिषेधयोः भावो विनिगमनाभावोऽस्ति। यथा-

व्रज ममैवकस्या भवन्तु निःश्वासरोदितव्यानि।
मा तवापि तया विना दाक्षिण्यहतस्य जनिषत।।[67]

इयमुक्तिः कस्याश्चित् खण्डिताया नायिकायाः। परस्त्री उपभोगजन्यं लक्षणं दृष्ट्वा अतीव दुःखपूर्वकेन कथयति – गच्छ ! दीर्घश्वासं च रोदनं केवलमात्रं मह्यं तिष्ठ। तव दाक्षिण्याभावे सा न दुःखी आप्नुयात्। खण्डितायाः नायिकायाः प्रसङ्गे कथयति -

"नीत्वाऽन्यत्र निशां प्रातरागते प्राणवल्लभे।

अन्यासम्भोगचिह्नैस्तु कुपिता खण्डिता मता"।।

अत्र वाच्ये विधिनैव, परन्तु प्रतीयमानार्थे नापि विधिः अन्तरमेवान्यनिषाधाभावः विद्यते।

---

66 ध्वन्यालोकः, (सम्पा.) - आचार्यः विश्वेश्वरः, पृ- १५

67 ध्वन्यालोकः, (सम्पा.) - आचार्यः विश्वेश्वरः (पृ- १५)

**चतुर्थतः**, कदाचित् वाच्ये प्रतिषेधरूपेण, परन्तु प्रतीयमानार्थे विधिनिषेधयोर्भावः अव्यक्तः। यथा-

"प्रार्थये तावत् प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे।
अभिसारिकाणां विघ्नं करोषि अन्यासामपि हताशे"।।[68]

आचार्यविश्वेश्वरेण श्लोकस्यास्य त्रिस्रः प्रकाराः व्याख्या प्रकटीकृताः। परन्तु आद्ययोः व्याख्ययोः अनौचित्यात् तृतीयप्रकारा व्याख्या स्वीकृता –

नायकस्य गृहे नायिका आगता। वार्तालापवशात् नायकेन भ्रमाद् अन्याया नायिकायाः नाम उच्चार्य समागताया नायिकाया सम्बोधनं कृतम्। अभिमानिनी नायिका तदा तत्सामीप्यात् गमनोद्यतेति दृष्ट्वा नायकः तां तोषयति - "तव मुखशशिज्योत्स्ना........." इत्यादिना। वाच्यार्थे निषेधेऽपि प्रतीयमानार्थे विधिनिषेधयोर्भावः नास्ति।

श्लोकस्यास्य अन्या व्याख्यापि भवितुम् अर्हति – 'क्वापि नायिका प्रियतमस्य गृहं गन्तुं उद्यता सती तस्या सखी ताम् अवदत् – न केवलमात्मनो विघ्नं करोषि, लाघवादबहुमानास्पदमात्मानं कुर्वती, अतएव हताशा, यावद्वदनचन्द्रिकाप्रकाशितमार्गतया अन्यासामपि अभिसारिकाणां विघ्नं करोषीति सख्यभिप्रायरूपश्चाटुविशेषो व्यङ्ग्यः' इति लोचनकृत्।

'अत्र तु व्याख्यानद्वये अपि व्यवसितात् प्रतीपगमनात् प्रियतमगृहगमनाच्च निवर्त्तयस्व इति पुनरपि वाच्य एव विश्रान्तेः गुणीभूतव्यङ्ग्यभेदस्य प्रेयोरसवदलंकारस्योदाहरणमिदं स्यात्, न तु ध्वनेः' इति अभिनवगुप्तः प्राह ।

[68] तत्रैव , पृ- १६

## वाच्य-व्यङ्ग्ययोर्मध्ये विषयगतभेदप्रतिपादनम्-

वाच्य-व्यङ्ग्यार्थयोर्मध्ये आचार्येण आनन्दवर्धनेन विषयगतभेदः दिङ्मात्रं प्रदर्श्यते। तद्यथा -

"कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।

सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम्"।।[69]

इति श्लोकस्य अयमेव भावः – 'काचिद् अविनीता कुतश्चित् खण्डिताधरा निश्चिततत्सविधसन्निधाने तद्भर्त्तरि तमनवलोकमानयेव कयाचिद्विदग्धसख्या तद्वाच्यतापरिहारायैवमुच्यते सहस्वेदानीम् इति वाच्यम् अविनयवतीविषयम्। भर्त्तृविषयन्तु अधराधो नास्तीति आवेद्यमान व्यङ्ग्यम्' इति लोचनकारः। सपत्न्यां सौभाग्यातिशयख्यापनं प्रियायाः इति शब्दबलादिति सपत्नीविषयकं व्यङ्ग्यम्। सहस्व नाम शोभस्व इदानीमिति सखीविषयं सौभाग्यप्रख्यापनं व्यङ्ग्यम्। प्रसङ्गं किञ्चित् परिवर्त्य प्रच्छन्ननायकं प्रति सख्या उपदेशो यत् कथमपि 'प्रकटरदनदंशनविधिर्न विधेय इति तच्चौर्यकामुकविषयसम्बोधनं व्यङ्ग्यम्। इत्थं मया एतदपह्नुतमिति स्ववैदग्धख्यापनं तटस्थविदग्धलोकविषयं व्यङ्ग्यमिति। तदेतदुक्तं व्यवस्थापितशब्देन' इति लोचनटीकायां टीकितम्।

## निष्कर्षः -

सर्वैः आचार्यैः मन्यते यत् शब्दार्थवृत्तयः प्रत्येकं भेदत्रयोपेताः। आशाधरभट्टेन शब्दार्थशक्तीनाम् एकत्र संकलनं कृतम् । अर्थस्य त्रयो भेदाः सन्ति - १) शक्यः, वाच्यः, अभिधेयः, मुख्यार्थः २) लक्ष्यः, औपचारिकः, भाक्तः ३) व्यङ्ग्यः, गम्यः, प्रतीत्यः,

[69] ध्वन्यालोकः, (सम्पा.) आचार्यः विश्वेश्वर, पृ- १७

द्योतकः, ध्वनितः। अर्थानुसारं शब्दस्त्रिविधः – वाचकः लाक्षणिकः व्यञ्जकश्चेति। वृत्तिरपि त्रिधा विभक्ता- १) शक्तिः, अभिधा, मुख्या २) लक्षणा, भक्तिः, उपचारः ३) व्यञ्जना, द्योतना, प्रत्यायना।

आङ्गलसाहित्येऽपि 'Primary Sense' इत्यनेनाभिधा तथा च 'Secondary Sense' इत्यनेन लक्षणावबुध्यते। लेभि–ओयेबलिमहाभागस्तदीये 'Signifies and Language' इत्याख्ये ग्रन्थे शब्दस्यार्थत्रयं स्वीकृतवान्–

"The one crucial question in all expression is its special property, first of sense, that in which it is used, then of meaning as the intention of the user, and, most far reaching and momentous of all, of implication, of ultimate significance."[70] इति।

मीमांसादर्शने वाक्यवाक्यार्थविचारो वैदिकविधीनाम् अर्थनिर्णयप्रसङ्गे विहितः। परं लोकेऽपि तदानीं व्यास-वाल्मीकि तेषां तदा व्यरच्यन्त। काव्यानि कालिदासादिभिः समालोचनं काव्यानामपि महद्गुरुत्ववहम् अभवत्। अतः शाब्दवोधे यथा नैयायिकानां मीमांसकानां च मतानि विद्यन्ते, तथैव कया वृत्तया पदेभ्यः अर्थः व्यज्यते, नोच्यते, नापि लक्ष्यते, तत्तु मम्मटादिभिः प्रभृतिभिरालंकारिकैरपि अलंकारशास्त्रेषु आटीकितम्। व्यञ्जनावृत्तिमन्तरेण काव्यस्य चमत्कारित्वार्थस्य ज्ञानं आनन्दं च नैव स्फुट्यते अभिव्यञ्ज्यतेति मे शोधप्रबन्धस्य आशय।

[70] Signifies and Language (१९११), पृष्ठा - ९

# परिशीलिता ग्रन्थानुक्रमण्यः -


- काव्यप्रकाशः (मम्मटः) – (प्रथमादिषष्ठोल्लासान्तः), (अनुवादकः व्याख्यातश्च) ड. विमलाकान्तमुखोपाध्यायः, (सम्पा.) विपदभञ्जनपालः, संस्कृतपुस्तकभाण्डारः, कोलकाता, 1427 (प्रथमः प्रकाशः).
- काव्यादर्शः (दण्डिविरचितः) – (प्रेमचन्द्रतर्कवागीशकृतः मालिन्यप्रोञ्छनीटीकासमेतः) - (सम्पा.) चिन्मयीचट्टोपाध्यायः, पश्चिमवङ्गराज्यपुस्तकपर्षद्, कलिकाता, 1995.
- काव्यमीमांसा (राजशेखर-रचिता) (सम्पा.) सि.डि. दालालः तथा आर. ए. शास्त्री, (संशोधिता परिवर्धिता च) के. एस. रामस्वामी श्रास्त्री शिरोमणिः, ओरियेण्टाल इन्सटिटिउट, बडोदा, 1934 (तृतीयसंस्करणम्).
- तर्कभाषा (केशवमिश्रविरचिता) – (विश्वेश्वरसिद्धान्त-शिरोमणिकृता तर्करहस्यदीपिकाटीकायुता), चौखाम्वा संस्कृत संस्थान, वाराणसी, 2000 (दशम संस्करण).
- तर्कसंग्रहः – (अन्नंभट्टविरचितः) – (सम्पा.) सत्कारिशर्मा, चौखाम्वा संस्कृत सिरिज अफिस, वेनारस,1969.
- ध्वन्यालोकः (आनन्दवर्धनः) – (लोचनटीकासहितः), प्रथमश्च द्वितीय उद्योतः, (सङ्कलितोऽनूदितो व्याख्यातः) ड. विमलाकान्तमुखोपाध्यायः, (सम्पा.) अशोककुमारमुखोपाध्यायः, संस्कृतपुस्तकभाण्डारः, कलकाता, 2008 (परिमार्जितं संस्करणम्).
- परमलघुमञ्जुषा (नागेशविरचिता) (सम्पा.) अलखदेवशर्मा, अमरभारती प्रकाशन, वाराणसी, 1981.
- वाक्यपदीयः (ब्रह्मकाण्डः) (सम्पा.) विष्णुपदभट्टाचार्यः, पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलिकाता.
- शब्दशक्तिप्रकाशिका – मधुसूदनभट्टाचार्यन्यायाचार्येण अनूदितो व्याख्यातश्च, संस्कृत कलेज, कलिकाता 1980.
- साहित्यदर्पणः (विश्वनाथः) – (कुसुमप्रतिमाटीकोपेतः) - (सम्पा.) हरिदाससिद्धान्तवागीशः, कोलकाता, 1967 शकाब्दः (चतुर्थसंस्करणम्).
- 'व्यञ्जनाविमर्शः' – ड. रविशङ्करनागर, वन्दना प्रकाशन, दिल्ली, 1977.